# yamunAShTapadI

# યમુનાષ્ટપદી

## Document Information

Text title : yamunAShTapadI

File name : yamunAShTapadI.itx

Category : devii, nadI, puShTimArgIya, aShTaka, viThThaleshvara, devI

Location : doc_devii

Author : viThThaleshvara

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# યમુનાષ્ટપદી

નમો દેવિ યમુને નમો દેવિ યમુને
હર કૃષ્ણમિલનાન્તરાયમ્ ।
નિજનાથમાર્ગદાયિનિ કુમારી-
કામપૂરિકે કુરુ ભક્તિરાયમ્ ॥ ધ્રુ૦॥

મધપકુલકલિતકમલીવલીવ્યપદેશ-
ધારિતશ્રીકૃષ્ણયુતભક્તહૃદયે ।
સતતમતિશયિતહરિભાવના-
જાતતત્સારૂપ્યગદિતહૃદયે ॥ ૧॥

નિજકૂલભવવિવિધતરુકુસુમ-
યુતનીરશોભયા વિલસદલિવૃન્દે ।
સ્મારયસિ ગોપીવૃન્દપૂજિત-
સરસમીશવપુરાનન્દકન્દે ॥ ૨॥

ઉપરિ બલદમલકમલારુણ-
દ્યુતિરેણુપરિમલિતજલભરેણામુના ।
વ્રજયુવતિકુચકુમ્ભકુઙ્કુમારુણ-
મુરઃ સ્મારયામિ મારપિતુરધુના ॥ ૩॥

અધિરજનિ હરિવિહૃતિમીક્ષિતું
કુવલયાભિધસુભગનયનાન્યુશતિ તનુષે ।
નયનયુગમલ્પમિતિ બહુતરાણિ
ચ તાનિ રસિકતાનિધિતયા કુરુષે ॥ ૪॥

રજનિજાગરજનિતરાગરઞ્જિત-
નયનપઙ્કજૈરહનિ હરિમીક્ષસે ।
મકરન્દરભરમિષેણાનન્દપૂરિતા
સતતમિહ હર્ષાશ્રુ મુઞ્ચસે ॥ ૫॥

તટગતાનેકશુકસારિકામુનિ-
ગણસ્તુતવિવિધગુણસીધુસાગરે ।
સઙ્ગતા સતતમિહ ભક્તજન-
તાપહૃદિ રાજસે રાસરસસાગરે ॥ ૬॥

રતિભરશ્રમજલોદિતકમલ-
પરિમલવ્રજયુવતિમોદે ।
તાટઙ્કચલનસુનિરસ્તસઙ્ગીત-
યુતમદમુદિતમધુપકૃતવિનોદે ॥ ૭॥

નિજવ્રજજનાવનાત્તગોવર્દ્ધને
રાધિકાહૃદયગતહૃદયકમલે ।
રતિમતિશયિતરસવિઠ્ઠલસ્યાશુ
કુરુ વેણુનિનદાહ્વાનસરલે ॥ ૮॥

શ્લોકૌ ।
વ્રજપરિવૃઢવલ્લભે કદા ત્વ-
ચ્ચરણસરોરુહમીક્ષણાસ્પદં મે ।
તવ તટગતવાલુકાઃ કદાહં
સકલનિજાઙ્ગતા મુદા કરિષ્યે ॥ ૧॥

વૃન્દાવને ચારુબૃહદ્વને મ-
ન્મનોરથં પૂરય સૂરસૂતે ।
દૃગ્ગોચરઃ કૃષ્ણવિહાર એવ
સ્થિતિસ્ત્વદીયે તટ એવ ભૂયાત્ ॥ ૨॥

ઇતિ શ્રીવિઠ્ઠલેશ્વરવિરચિતા યમુનાષ્ટપદી સામાપ્ત ।

Proofread by PSA Easwaran

*yamunAShTapadI*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*